लोकप्रियसाहित्यग्रन्थमाला - 32

# जगन्नाथसुभाषितम्

## ( जगन्नाथपाठकविरचितम् )

सम्पादक:
बनमाली बिश्वाल:

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालय:
नवदेहली

लोकप्रियसाहित्यग्रन्थमाला - 32

# जगन्नाथसुभाषितम्

( जगन्नाथपाठकविरचितम् )

सम्पादकः

**बनमाली बिश्वालः**

राष्ट्रियसंस्कृतसंस्थानम्

**मानितविश्वविद्यालयः**

नवदेहली

# कवितानुसन्धानम्


**जगन्नाथसुभाषितम् ( भागः - 1 )** **1-86**

1. आदिकविर्वाल्मीकिः 3
2. हे कालिदास ! 6
3. कविकुलगुरो! यदि स्वदेशस्त्वमागच्छेः 9
4. पण्डितराज-प्रशस्ति-शतकम् 14
5. भट्टमथुरानाथ/मंजुनाथ-प्रशस्तिः 26
6. दाराशिकोहः 29
7. कविता तदा मे मनसि समुन्मीलति 32
8. हे घनश्याम! (1) 36
9. हे घनश्याम! (2) 39
10. सर्वज्ञः 41
11. गङ्गाया व्यथितम् 46
12. अक्षयवटस्य व्यथा 49
13. वाग्देवताया व्यथितम् 52
14. काकानां व्यथितम् 55
15. पङ्कस्य सुखम् 58
16. दीपावली 60
17. गजेन्द्र-मोक्षः 63
18. हंसान् प्रति 66
19. मानवते ! 68
20. दिनेष्वेषु 71
21. दाण्डी-यात्रा 74
22. ग्रामटिका 77
23. सम्मार्जनी 80
24. दलित-प्रसङ्गः 83

**जगन्नाथसुभाषितम् ( भागः - 2 )** **87-443**

**जगन्नाथसुभाषितम् ( भागः - 3 )** **445-548**

**परिशिष्टम्** जगन्नाथसुभाषित-पद्यानाम् अकारादिक्रमसूची 549-618

## कविकुलगुरो ! यदि स्वदेशस्त्वमागच्छेः !

कविकुलगुरो! स्वदेशं प्रावृषि यदि भारतं त्वमागच्छेः।
देशस्य वर्तमानं खिन्नः स्याः स्वस्य परिलक्ष्य।।1।।

स्निग्धच्छायातरवो वैदेहीस्नानपुण्यसलिलास्ते।
नैवाश्रमा मिलेयू रामगिरेस्तेषु शृङ्गेषु।।2।।

आषाढस्य प्रथमे दिवसे प्रशमेऽपि वा समायाते।
वप्रक्रीडा-परिणतगज इव मेघो न दृश्येत।।3।।

सततं क्वचिदतिवृष्टिः सततमनावृष्टिरपि च कुत्रापि।
परिवर्तनमनुभूतं भविता मेघस्य तत्प्रकृतौ।।4।।

पुञ्जितधूम इवायं विचरति गगने न वस्तुतो जलदः।
सन्तप्तानां शरणं विद्धि न भविता कथञ्चिदपि।।5।।

न मिलेन्मेघेन समं त्वद्यात्रायां कदाचिदनुकूलः।
मन्दं मन्दञ्च नुदन् सहचर इव कोऽपि ते पवनः।।6।।

नापि सगन्धः कश्चिन्मिलेदितश्चातको नदन् मधुरम्।
नहि बद्धपङ्क्तयस्त्वां सेविष्यन्ते बलाकाश्च।।7।।

घनगर्जितं न जनयति कन्दलिकां भूमितो दिनेष्वेषु।
उड्डयमाना गगने न राजहंसाश्च दृश्यन्ते।।8।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली